

**Sri Lakshmi Nrusimha ParabrahmaNe Nama:**
**Sri Navaneetha Krishna ParabrahmaNe Nama:**
Srimate Sri Ramanujaya Nama: | Srimate Sri Nigamantha Maha Desikaya Nama:
Srimate Sri Adivan Satakopa Yatheendra Maha Desikaya Nama:
Srimate Sri Lakshmi Nrisima Divya Paduka Sevaka Srivan Satakopa Sri Narayana Yatheendra Maha Desikaya Nama: |
Srimate Srivan Satakopa Sri Ranganatha Yatheendra Maha Desikaya Nama:

Brindhavan Japam

# कामासिकाष्टकम्

## श्रीवेदान्तदेशिकृतम्

This document is prepared by Jayanthi Parthasarathy with
Asmad Acharyans Paripoorna Anugraham



## श्रीवेदान्तदेशिकृतम्

# श्रीमान वेंकट नाथर्य कविथार्किका केसरी
# वेदान्ताचार्य वर्योमे सन्निधात्याम् सदाहृदि

1. श्रुतीनामुत्तरं भागं वेगवत्याश्च दक्षिणम् ।
कामादधिवसन् जीयात्कश्चिदद्भुतकेसरी ।।

2. तपनेन्द्वग्निनयनः तापानपचिनोतु नः ।
तापनीयरहस्यानां सारः कामासिकाहरिः।।

3. आकण्ठमादिपुरुषं कण्ठीरवमुपरि कुण्ठितारातिम् ।
वेगोपकण्ठसङ्गाद्विमुक्तवैकुण्ठबहुमतिमुपासे ।।

4. बन्धुमखिलस्य जन्तोर्बन्धुरपर्यङ्कबन्धरमणीयम् ।
विषमविलोचनमीडे वेगवतीपुलिनकेलिनरसिंहम् ।।

5. स्वस्थानेषु मरुद्गणान् नियमयन् स्वाधीनसर्वेन्द्रियः
पर्यङ्कस्थिरधारणाप्रकटितप्रत्यङ्मुखावस्थितिः ।
प्रायेण प्रणिपेदुषः प्रभुरसौ योगं निजं शिक्षयन्
कामानातनुतादशेष जगतां कामासिका केसरी ।।

6. विकस्वरनखस्वरुक्षतहिरण्यवक्षःस्थली ।
निरर्गलविनिर्गलद्रुधिरसिन्धुसन्ध्यायिताः ।।

7. अवन्तु मदनासिका मनुजपञ्चवक्त्रस्य मां ।
अहम्प्रथमिका मिथः प्रकटिताहवा बाहवः ।।

8. सटापटलभीषणे सरभसाट्टहासोद्भटे
स्फुरत्क्रुधिपरिस्फुटभ्रुकुटिकेऽपि वक्त्रे कृते ।
कृपाकपटकेसरिन् दनुजडिम्भदत्तस्तना
सरोजसदृशा दृशा व्यतिविषज्य ते व्यज्यते ।।

Brindhavan Japam



9. त्वयि रक्षति रक्षकैः किमन्यैस्त्वयि चारक्षति रक्षकैः किमन्यैः ।
इति निश्चितधीः श्रयामि नित्यं नृहरे वेगवतीतटाश्रयं त्वाम् ॥

10. इत्थं स्तुतः सकृदिहाष्टभिरेष पद्यैः
श्रीवेङ्कटेशरचितैस्त्रिदशेन्द्रवन्द्यः ।
दुर्दान्तघोरदुरितद्विरदेन्द्रभेदी
कामासिकानरहरिर्वितनोतु कामान् ॥

**इति श्रीवेदान्तदेशिकृतं कामासिकाष्टकं सम्पूर्णम्**

**कवितार्किकसिंहाय कल्याणगुणसालिने**

**श्रीमते वेङ्कटेसाय वेदान्तगुरवे नमः**

Brindhavan Japam